## स्कोः संयोगाद्योरन्ते च। (२९/३८०)

पदस्यान्ते यः संयोगः, झलि परतो वा यः संयोगः, तदाद्योः सकारककारयोर्लोपो भवति। लस्जेः – लग्नः। लग्नवान्। साधुलक्। मस्जेः – मग्नः[1]। ककारस्य – तक्षेः – तट्। तष्टः। तष्टवान्। काष्ठतट्।

[११७] झलि सङीति वक्तव्यम्।

किमिदं सङि इति ? सनः [2]सप्रभृति महिङो ङकारेण प्रत्याहारः। इह मा भूत्, काष्ठशक्स्थाता इति। थकारे झलि ककारस्य संयोगादेर्लोपः प्राप्नोति। तदत्र शकेः क्विबन्तस्य प्रयोग एव नास्ति [3]इत्याह – काष्ठशगेव नास्ति, कुतोऽयं काष्ठशकि तिष्ठेत् इति। वास्यर्थम्, काक्वर्थम् इत्यत्रापि बहिरङ्गलक्षणस्य यणादेशस्यासिद्धत्वात् संयोगादिलोपो न भवति। स्कोः इति किम् ? नर्नर्ति। वर्वर्ति। संयोगाद्योः इति किम् ? [4]पयःशक्। अन्ते च इति किम् ? [5]तक्षितः। तक्षकः॥

## चोः कुः। (३०/३७८)

चवर्गस्य कवर्गादेशो भवति झलि परतः, पदान्ते च। पक्ता। पक्तुम्। पक्तव्यम्। ओदनपक्। वक्ता। वक्तुम्। वक्तव्यम्। वाक्।

कुञ्चा इत्यत्र [6]सङि [7]इति वचनाद् ञकारस्य चकारे झलि[8] कुत्वं न भवति, युजिक्रुञ्चां च (३.२.५९/३७३) इति निपातनाद् वा। नकारोपधो वा धातुरयं रेफरहितश्च 'क्रुञ्च कौटिल्याल्पीभावयोः' (धा.पा. १८६) इति पठ्यते। नकारलोपे हि [9]निकुचितिः इति[10] दृश्यते। युजिक्रुञ्चां च (३.२.५९/३७३) इति तस्यैव रेफोऽधिको नकारस्य लोपाभावश्च इति निपात्यते। [11]तत्रानुस्वारस्य [12]परसवर्णस्य च असिद्धत्वात्[13] ञकार एव नास्ति इति कुत्वं न [14]भविष्यति॥

## हो ढः। (३१/३२४)

हकारस्य ढकारादेशो भवति झलि परतः पदान्ते च। सोढा। सोढुम्। सोढव्यम्। [15]जलाषाट्। वोढा। वोढुम्। वोढव्यम्। प्रष्ठवाट्। [16]दित्यवाट्॥

## दादेर्धातोर्घः। (३२/३२७)

दकारादेः धातोः हकारस्य घकारादेशो भवति झलि परतः पदान्ते च। दग्धा। दग्धुम्। दग्धव्यम्। काष्ठधक्। दोग्धा। दोग्धुम्। दोग्धव्यम्। गोधुक्। [17]दादेः इति किम् ? लेढा। लेढुम्। लेढव्यम्।

---

1. मग्नवान्, साधुमक् इत्यधिकम् इ.क.ड.ब. 2. प्रभृति ड.ब. 3. अत एवाहुः ब.ड. 4. पयस्त्रक् इ. 5. अतक्षीत् इ.ह, तक्षिता क, रक्षितः ड. ब. 6. झलि इत्यधिकम् इ. ब. 7. इति नास्ति क. 8. परतः इत्यधिकम् क.इ.ब. 9. निकुचितम् इ. 10. प्रयोगो इत्यधिकम् क.ब. 11. अत्र क.इ. 12. ययि इत्यधिकम् क.इ.ह. 13. तत्र इत्यधिकम् ब. 14. भवति क. 15. तुराषाट् ड. 16. पर्ववाट् ब. ह. 17. दादेः –गुडलिट् नास्ति इ.ह.ड.ब.